# ॥ भावोपनिषत् ॥

॥ अथ भावोपनिषत्॥
ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं
पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः ।
व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो ऽरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
ॐ शान्तिः शान्तिः शान्तिः ॥
आत्मानमखण्दमण्दलाकारमवृत्य सकलब्रह्मान्दमन्दलं
स्वप्रकाशं ध्यायेत् । श्रीगुरुः सर्वकारणभूता शक्तिः ॥ १॥
तेन नवरन्ध्ररूपो देहः ॥ २॥ नवचक्ररूपं श्रीचक्रम् ॥ ३॥
वाराही पितृरूपा कुरुकुल्ला बलिदेवता माता ॥ ४॥
पुरुर्षाथाः सागराः ॥ ५॥ देहो नवरत्नद्वीपः ॥ ६॥
त्वगादि सप्तधातुरोमसंयुक्तः ॥ ७॥
संकल्पाः कल्पतरवस्तेजः कल्पकोद्यानम् ॥ ८॥
रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणरसाः षड्तवः ॥ ९॥
ज्ञानमर्घ्यम् ज्ञेयम् हविर्ज्ञाता होता
ज्ञातृज्ञानज्ञेयानामभेदभवनम् श्रीचक्रपूजनम् ॥ १०॥
नियतिः श्रृङ्गारादयो रसा अणिमादयः ॥ ११॥
कामक्रोधलोभमोहमदमार्त्सयपुण्यपापमया
ब्राह्म्याद्यषटशक्तयः ॥ १२॥
आधरनवकम् मुद्राशक्तयः ॥ १३॥
पृथिव्यप्तेजोवाइवाकाशाश्रोत्रत्वक्चक्षुर्जिह्वघ्राण-
वाक्पाणिपादपायूपस्थानि मनोविकाराः
कामाकर्षिण्यादि षोदश शक्तयः ॥ १४॥
वचनादानागमनविसर्गानन्दहानोपादानोपेक्षाख्य-
भुद्धयोऽनङ्गकुसुमाद्यष्टौ ॥ १५॥
अलम्बुसा कुहुर्विश्वोदरा वारणा हस्तिजिह्वा यशोवती पयस्विनी
गान्धारी पूषा शङ्खिनी सरस्वतीडा पिङ्गला सुषुम्ना चेति
चतुर्दश नाड्यः सर्वसंक्ष्होभिण्यदि चतुर्दशशक्तयः ॥ १६॥
प्राणापानव्यानोदानसमाननागर्कूमकृकरदेवदत्तधनंजया
दशवायवः सर्वसिद्धिप्रदादिबहिर्दशारदेवताः ॥ १७॥

एतद्वायुसंसर्गकोपाधिभेधेन रेचकः पाचकः शोषको
दाहकः प्लावक इति प्राणमुख्यवेन पंचधा जठराग्निर्भवति॥ १८॥
क्षारक उद्धारकः क्षोभको जृंभको मोहक इति
नागप्राधान्येन पंचबिधास्ते मनुष्याणां देहगा
भक्ष्यभोज्यशोष्यलेह्यपेयात्मकपञ्चविधमन्नं पाचयन्ति॥ १९॥
एता दशवह्निकलाः सर्वज्ञाद्या अन्तर्दशारदेवताः ॥ २०॥
शीतोष्णासुखदुःखेच्छाः सत्त्वं रजस्तमो
वशिन्यादिशक्त्थयोअष्तौ ॥ २१॥
शब्दादि तन्मात्राः पंचपुष्पबाणाः ॥ २२॥ मन इक्षुधनुः ॥ २३॥
रागः पाशः ॥ २४॥ द्वेषोऽङ्कुशः ॥ २५॥
अव्यक्त महदहंकाराः कामेक्ष्वरी वज्रेश्वरी
भगमालिन्योऽन्तस्त्रिकोणगा देवताः ॥ २६॥
निरुपाधिकसंविदेव कामेश्वर ॥ २७॥
सदानन्दपूर्ण स्वात्मेव परदेवता ललिता ॥ २८॥
लौहित्यमेतस्य सर्वस्य विमर्श ॥ २९॥
अनन्यचित्तत्वेन च सिद्धिः ॥ ३०॥ भावनायाः क्रिया उपचरः ॥ ३१॥
अहं त्वमस्ति नास्ति कर्तव्यमकर्तव्यमुपासितव्यमिति
विकल्पानामात्मनि विलापनम् होमः ॥ ३२॥
भवनाविषयाणामभेदभवना तर्पणम् ॥ ३३॥
पंचदशतिथिरूपेण कालस्य परिणामावलोकनम् ॥ ३४॥
एवम् मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा
भावनापरो जीवन्मुक्तो भवति स एव शिवयोगीति गद्यते॥ ३५॥
आदिमतेनान्तश्चक्रभावनाः प्रतिपादिताः ॥ ३६॥
य एवं वेद सोऽथर्वशिरोऽधीते ॥ ३७॥
इत्युपनिषत् ॥
ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं
पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
ॐ शान्तिः शान्तिः शान्तिः ॥
॥ इति भावोपनिषत् ॥

Encoded by P. P. Narayanaswami (swami at math.mun.ca)

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010